# झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची
## वार्षिक परीक्षा 2023-24
## आदर्शप्रश्नपत्रम्
## संस्कृतम् (ऐच्छिकम्)
## (बहुविकल्पीयाः प्रश्नाः)

**कक्षा – नवमी** **विषयः - संस्कृतम्**

**समयः -** 1.30 Hr **पूर्णांकाः – 40**

**सामान्य निर्देशाः -**

- अस्मिन् प्रश्नपत्रे चत्वारिंशत् (40) प्रश्नाः। (इस प्रश्न-पत्र में 40 प्रश्न हैं।)
- सर्वे प्रश्नाः अनिवार्याः। (सभी प्रश्न अनिवार्य हैं।)
- प्रत्येक प्रश्नार्थं एकोऽङ्को निर्धारितः। (प्रत्येक प्रश्न के लिए एक अंक निर्धारित है।)
- प्रत्येक प्रश्नस्य चत्वारो विकल्पाः। उचितविकल्पं चिनुत। (प्रत्येक प्रश्न के चार विकल्प दिए गए हैं। उचित विकल्प का चयन करें।)
- अनुचितोत्तरार्थं कोऽपि नकारात्मकाङ्को नास्ति। (गलत उत्तर के लिए कोई नकारात्मक अंक नहीं है।)

---

खण्डः - क

अपठितांश – अवबोधनम्

अधोलिखितं गद्यांशं पठित्वा विकल्पेभ्यः उचितमुत्तरं चिनुत-

पश्य, पश्य! तत्र एकम् उद्यानम् अस्ति। उद्यानं न केवलं सुन्दरम् अपितु विशालम् अपि अस्ति। जनाः न केवलं मनोरुञ्जनाय अपितु विश्रामाय, चित्तस्य आहलादाय, शुद्धपवनाय च उद्यानेषु भ्रमन्ति। तत्र उन्नताः वृक्षाः, मनोहराणि पुष्पाणि खगानां च मधुरध्वनिः सर्वेभ्यः जीवेभ्यः सदैव सुखम् एव यच्छति।

1. उद्यानं कीदृशम् अस्ति?

क. विशालम् ख. शुष्कम् ग. दूषितम् घ. हरितम्

2. उद्याने कीदृशाः वृक्षाः सन्ति?

क. शुष्काः ख. दीर्घाः ग. उन्नताः घ. विशालाः

3. उद्यानेषु के भ्रमन्ति?

क. पशवः ख. खगाः ग. कृषकाः घ. जनाः

4. 'मनोरुञ्जनाय' इति पदे का विभक्तिः?

क. प्रथमा ख. चतुर्थी ग. तृतीया घ. पञ्चमी

खण्डः - ख

पठितावबोधनम् - अनुप्रयुक्तव्याकरणम्

अधोलिखितं गद्यांशं पठित्वा विकल्पेभ्यः उचितमुत्तरं चिनुत-

धर्मो रक्षति रक्षितः इत्यार्षवचनम्। पर्यावरणरक्षणमपि धर्मस्यैवाङ्गमिति ऋषयः प्रतिपादितवन्तः। अत एव वापीकूपतडागादिनिर्माणं देवायतन – विश्रामगृहादिस्थापनञ्च धर्मसिद्धेः स्रोतो रूपेण अङ्गीकृतम्। कुक्कुर-सूकर-सर्प- नकुलादिस्थलचराः-, मत्स्यमकरप्रभृतयः -कच्छप-जलचराश्च अपि रक्षणीयाः, यतः ते स्थलमलानाम् अपनोदिनः जलमलानाम् अपहारिणश्च। प्रकृतिरक्षया एव लोकरक्षा सम्भवति इत्यत्र नास्ति संशयः।

5. 'पर्यावरणरक्षणमपि धर्मस्यैवाङ्गम्' इति के प्रतिपादितवन्तः?

क. कृषकाः ख. ऋषयः ग. वैज्ञानिकाः घ. ग्रामीणाः

6. प्रकृतिरक्षया एव कस्य रक्षा सम्भवति?

क. लोकरक्षा ख. परलोकरक्षा ग. देवरक्षा घ. धर्मरक्षा

7. 'धर्मो रक्षति रक्षितः' इति कस्य वचनम्?

क. आर्षस्य ख. देवस्य ग. ईश्वरस्य घ. असुरस्य

8. पर्यावरणरक्षणं कस्य अङ्गम् अस्ति?

क. धर्मस्य ख. वनस्य ग. धनस्य घ. अधर्मस्य

अधोलिखितं पद्यांशं पठित्वा विकल्पेभ्य: उचितमुत्तरं चिनुत-

गुणा गुणज्ञेषु गुणा भवन्ति,
ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः,
समुद्रमासाद्य भवन्त्यपेयाः॥

9. गुणा केषु गुणा भवन्ति?

क. गुणज्ञेषु ख. कविषु ग. निर्गुणेषु घ. नदीषु

10. आस्वाद्यतोयाः काः प्रवहन्ति।

क. नद्यः ख. कूपाः ग. समुद्राः घ. धाराः

11. 'प्रवहन्ति' इति पदे कः उपसर्गः?

क. परा ख. प्र ग. सु घ. निर्

12. 'नद्यः' इति पदे का विभक्तिः?

क. प्रथमा ख. तृतीया ग. सप्तमी घ. पञ्चमी

अधोलिखितं नाट्यांशं पठित्वा विकल्पेभ्य: उचितमुत्तरं चिनुत-

तपोदत्तः नूनं !मामेवोद्दिश्य भद्रपुरुषोऽयम् अधिक्षिपति !अये (सवैलक्ष्यम् आत्मगतम्) - सत्यमत्र पश्यामि। अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषामितदियं भगवत्याः शारदाया ! अवमानना। गुरुगृहं गत्वैव विद्याभ्यासो मया करणीयः। पुरुषार्थैरेव लक्ष्यं प्राप्यते। (प्रकाशम्(भो नरोत्तमनाऽहं जाने यत् कोऽस्ति भवान्। परन्तु भवद्भिः उन्मीलितं मे ! नयनयुगलम्। तपोमात्रेण विद्यामवाप्तुं प्रयतमानः अहमपि सिकताभिरेव सेतुनिर्माणप्रयासं करोमि। तदिदानीं विद्याध्ययनाय गुरुकुलमेव गच्छामि। (सप्रणामं गच्छति)

13. कः अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषति?

क. देवदत्तः ख. पुरुषः ग. तपोदत्तः घ. नरः

14. भवद्भिः उन्मीलितं मे नयनयुगलम्। अत्र 'मे' इति पदं कस्मै प्रयुक्तम्?

क. तपोदत्ताय ख. पुरुषाय ग. नराय घ. गुरुकुलाय

15. तपोदत्तः गुरुकुलं किमर्थं गच्छति?

क. क्रीडनाय ख. दर्शनाय ग. भ्रमणाय घ. विद्याध्ययनाय

16. 'विद्याध्ययनाय' इति पदे का विभक्तिः?

क. तृतीया ख. चतुर्थी ग. पञ्चमी घ. षष्ठी

रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणार्थम् उचितविकल्पं चिनुत।

17. प्रकृतिः <u>जीवनसुखं</u> प्रददाति।

क. कः ख. कं ग. किं घ. का

18. पर्यावरणरक्षणं <u>धर्मस्य</u> अङ्गम् अस्ति।

क. कस्य ख. कस्याः ग. कम् घ. केषाम्

19. <u>वृक्षाः</u> फलं न खादन्ति।

क. काः ख. के ग. कः घ. कानि

20. खलानां मैत्री आरम्भगुर्वी भवति।

क. कान्  ख. केभ्यः  ग. केषां  घ. कस्याः

प्रदत्तोच्चारणस्थानार्थम् उचितविकल्पं चिनुत।

21. 'न' इति वर्णस्य उच्चारणस्थानं किम्?

क. कण्ठः  ख. दन्तः  ग. ओष्ठः  घ. नासिका

22. तालव्यवर्णः कः?

क. प  ख. क  ग. च  घ. ह

23. 'प' इति वर्णस्य उच्चरणस्थानं किम्?

क. ओष्ठः  ख. तालुः  ग. मूर्धा  घ. दन्तोष्ठः

सन्धि/सन्धिविच्छेदार्थम् उचितविकल्पं चिनुत।

24. एव सदा + = ------

क. सदैव  ख. सदाएव  ग. सदेव  घ. सदएव

25. महा + ऋषिः = ------

क. महाऋषि  ख. महर्षिः  ग. महर्षीः  घ. महर्सीः

26. कुत्रापि = ----- + ------

क. कुत्र + पि  ख. कुत्र + अपि  ग. कुत्रा + अपि  घ. कु + त्रापि

रिक्तस्थानार्थम् उचितशब्दरूपाणि चिनुत।

27. ------- क्षेत्रं कर्षति।

क. कृषकौ  ख. कृषकः  ग. कृषकाय  घ. कृषकेन

28. हर्षा ------ लिखति।

क. कलम  ख. कलमे  ग. कलमं  घ. कलमेन

29. बालकशब्दस्य षष्ठीविभक्तेः एकवचने किं रूपम् अस्ति?

क. बालकः  ख. बालकस्य  ग. बालके  घ. बालकानाम्

रिक्तस्थानार्थम् उचितसंख्यावाचकपदानि चिनुत।

30. राधा -------- बालिका अस्ति।

क. एकम्  ख. एकः  ग. एका  घ. एकाः

31. तत्र -------- बालकाः क्रीडन्ति।

क. चत्वारि  ख. चतस्रः  ग. चत्वारः  घ. द्वौ

32. अधुना कक्षायां ------ छात्रौ स्तः।

क. द्वे  ख. त्रयः  ग. द्वौ  घ. पञ्च

रिक्तस्थानार्थम् उचितधातुरूपाणि चिनुत।

33. पूजा पत्रं ------ ।

क. लिखामि  ख. लिखावः  ग. लिखन्ति  घ. लिखति

34. 'पठति' इति क्रियापदस्य बहुवचने किं रूपं भवति?

क. पठन्ति  ख. पठतः  ग. पठामः  घ. पठसि

35. गम् धातोः लृट्लकारे प्रथमपुरुषबहुवचने किं रूपं भवति?

क. गमिष्यति  ख. गच्छन्ति  ग. गच्छतः  घ. गमिष्यन्ति

रिक्तस्थानार्थम् उचितोपपदविभक्तिरूपाणि चिनुत।

36. ------- विना सफलता न मिलति।

क. परिश्रम  ख. परिश्रमस्य  ग. परिश्रमं  घ. परिश्रमे

37. -------- उभयतः वृक्षाः सन्ति।

क. गृहम्  ख. गृहस्य  ग. गृहे  घ. गृहेषु

38. बालः ------ सह क्रीडति।

क. मित्रं  ख. मित्रस्य  ग. मित्रेण  घ. मित्राय

JCERT

रेखाङ्कितपदेभ्यः उचितप्रकृतिप्रत्ययं चिनुत।

39. चिरकालं भवने चित्रविचित्रवस्तूनि दृष्ट्वा सा विस्मयं गता।

क. दृश् + क्त

ख. दृश् + क्त्वा

ग. दृश् + तुमुन्

घ. दृश् + ल्यप्

40. कश्चन भ्रान्तः बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत्।

क. क्रीड् + तुमुन्

ख. क्रीड् + क्त्वा

ग. क्रीड् + क्त

घ. क्रीड् + ल्यप्

**झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची।**

**वार्षिक परीक्षा 2023-24**

**आदर्शप्रश्नपत्रम्**

**संस्कृतम् (ऐच्छिकम्)**

**(बहुविकल्पीयाः प्रश्नाः)**

**कक्षा – नवमी** **विषयः - संस्कृतम्**

**उत्तराणि**

---

**17. क.** विशालम्

**18.** ग. उन्नताः

**19.** घ. जनाः

**20.** ख. चतुर्थी

21. ख. ऋषयः

**22. क.** लोकरक्षा

**23.** क. आर्षस्य

**24.** क. धर्मस्य

**25. क.** गुणज्ञेषु

**26. क.** नद्यः

**27.** ख. प्र

**28. क.** प्रथमा

**29.** ग. तपोदत्तः

**30.** **क.** तपोदत्ताय

**31.** घ. विद्याध्ययनाय

**32.** ख. चतुर्थी

17. ग. किं

18. क. कस्य

19. ख. के

20. ग. केषां

21. ख. दन्तः

22. ग. च

23. क. ओष्ठः

24. क. सदैव

25. ख. महर्षिः

26. ख. कुत्र + अपि

27. ख. कृषकः

28. घ. कलमेन

29. ख. बालकस्य

30. ग. एका

31. ग. चत्वारः

32. ग. द्वौ

33. घ. लिखति

34. क. पठन्ति

35. घ. गमिष्यन्ति

36. ग. परिश्रमं

37. क. गृहम्

**38.** ग. मित्रेण

39. ख. दृश् + क्त्वा

40. क. क्रीड् + तुमुन्